**दिनाङ्क :- 06.04.2026**
**प्रात: - 06:55**

## अथ वार्ता:

### प्रधानमन्त्री- कूचबिहार

चतुर्षु राज्येषु एकस्मिन् केन्द्रशासित-प्रदेशे च विधानसभा-निर्वाचनार्थं प्रचारः चरमसीमायां वर्तते, यत्र मतदातॄन् आकर्षयितुं शीर्षनेतारः प्रयत्नरताः सन्ति । उत्तरबंगालस्य कूचबिहार-मण्डले ह्यः भाजपेति दलस्य वरिष्ठनेता, प्रधानमन्त्री श्रीनरेन्द्र-मोदी विशालजनसभां सम्बोधितवान् । श्रीमोदी पश्चिमबंगाल-राज्ये प्रचलित-घटनानाम् उद्धरणं दत्वा, सत्ताधारी तृणमूल-काङ्ग्रेस-सर्वकारस्य आलोचनां कृतवान् ।

प्रधानमन्त्रिणा राज्यस्य जनाः आश्वसिताः यद् यदि जनाः भाजपासर्वकारं सत्तायाम् आनयन्ति तर्हि सर्वकारः विकासं सुनिश्चित्य, अवैधरूपेण निवसन्तः विदेशी-जनान् बहिर्निष्कासयति । श्रीमोदिना उल्लेखितम् यत् अग्रिम-लोकसभानिर्वाचने महिला-आरक्षण-विधेयकस्य कार्यान्वयनम् अग्रे नेतुं सर्वकारेण अस्य मासस्य षोडश, सप्तदश, अष्टादश दिनाङ्केषु संसदः विशेषसत्रं आहूतमस्ति । एतन्मध्ये तृणमूलकाङ्ग्रेस-दलस्य प्रमुखा, राज्यस्य मुख्यमन्त्री ममता बनर्जी पश्चिमबङ्गालस्य विभिन्नेषु भागेषु जनसभां सम्बोधितवती ।

### केरलम्-प्रचारः

केरलम् राज्ये एर्णाकुलम मण्डलस्य कुन्नाथुनाड निर्वाचन-क्षेत्रे भाजपा-दलस्य वरिष्ठ नेता, अमित शाहः जनसभां संबोधितवान् । श्री-शाहः अवदत् यत् आगामि-केरलम्-विधानसभानिर्वाचनं केवलं सर्वकारस्य परिवर्तनार्थं न भवति, अपि तु राज्यस्य भविष्यस्य उन्नयनार्थं भवति ।

### असम-प्रचारः

असम-राज्ये भाजपा-दलस्य वरिष्ठ-नेता अथ केन्द्रीय-मन्त्री सर्वानन्द सोनोवालः धेमाजी इत्यत्र जनसभां सम्बोधितवान् । सः आरोपितवान् यत् पूर्वकाङ्ग्रेस-सर्वकारेण राज्ये अवैधप्रवेशस्य, भूमि-अतिक्रमणस्य च अनुमतिः प्रदत्ता। भाजपा-दलस्य-नेता असमस्य मुख्यमन्त्री हिमन्तविश्वसर्मा अपि बहुषु क्षेत्रेषु जनसभां सम्बोधितवान् ।

### जयशंकर-दूरभाष वार्तालापः

विदेश मंत्री डॉ एस जयशंकरः स्वस्य ईरानी-समकक्षेन अब्बास अराघची इत्यनेन सह ह्यः रात्रौ दूरभाषेण वार्तालापं कृतवान् । सामाजिक-माध्यम-सन्देशे डॉ-जयशंकरः उक्तवान् यत् द्वावपि तौ, पश्चिम एशिया संघर्षस्य वर्तमानस्थितेः विषये चर्चां कृतवन्तौ । डॉ जयशंकरः कतारस्य प्रधानमन्त्री विदेशमन्त्री च शेख मोहम्मद बिन् अब्दुल-रहमान इत्यनेन सह अथ यूएई देशस्य उपप्रधानमन्त्री विदेशमन्त्री च शेख अब्दुल्ला बिन् जायद अल नह्यान् इत्यनेन सह दूरभाषेण वार्तालापं कृतवान् । पश्चिम एशिया संघर्षे प्रचलितविकासानां विषये चर्चाः केन्द्रीकृताः आसन् ।

### ट्रम्प - इरान्

अमेरिका-राष्ट्रपतिः डोनाल्ड ट्रम्पः संचेतनां दत्तवान् यद्यदि इरान-देशः, मंगलवासरस्य अन्तिमसमयसीमायां होर्मुज् जलसन्धिं सर्वेषां नौकायानानां कृते पुनः न उद्घाटयति तर्हि अमेरिकिसैन्यं इरान-देशस्य विद्युत्-संयन्त्रं सेतून् च ध्वंसीकरोति ।

**अफगानिस्तान::**

अद्यतनजलप्रलयस्य भूकम्पस्य च कारणेन अफगानिस्तानदेशः कठिनपरिस्थितेः सम्मीखीकरणं कुर्वन्नस्तीति कारणेन भारतेन अफगानिस्तानदेशं प्रति, मानवीयसहायता तथा आपदुद्धार-सामग्र्यः प्रेषिताः। सामाजिक-माध्यम-सन्देशे विदेशमन्त्रालयेन उक्तं यत् साहायसामग्रिषु पाकशाला-सामग्र्यः, स्वच्छतासामग्री, शयनसामग्र्यः, अन्ये च आवश्यकवस्तूनि सन्ति।

**आईपीएल**

आईपीएल क्रिकेट्-क्रीडायां, रायल् चालेंजर्स् बेंगलूरु-दलेन चेन्नै सूपर् किंग्स् दलं त्रिचत्वारिंशत् धावनांकैः पराजितम्। अद्य सायं सार्धसप्तवादने,कोल्कत्तानगरस्य ईडन-गार्डन्स् क्रीडांगने कोलकाता-नाईट-राईडर्स पंजाब-किंग्स् दलं सम्मुखीकरिष्यति।

**।। इति वार्ता:।।**